योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः ०२१

एकविंशः सर्गः २१

श्रीवसिष्ठ उवाच ।

ज्ञानिनैव सदा भाव्यं राम न ज्ञानबन्धुना ।

अज्ञातारं वरं मन्ये न पुनर्ज्ञानबन्धुताम् ।। १

श्रीराम उवाच ।

किमुच्यते ज्ञानबन्धुर्ज्ञानी चैव किमुच्यते ।

किं फलं ज्ञानबन्धुत्वे ज्ञानित्वेऽपि च किं फलम् ।।२

श्रीवसिष्ठ उवाच ।

व्याचष्टे यः पठति च शास्त्रं भोगाय शिल्पिवत् ।

यतते न त्वनुष्ठाने ज्ञानबन्धुः स उच्यते ।। ३

कर्मस्पन्देषु नो बोधः फलितो यस्य दृश्यते ।

बोधशिल्पोपजीवित्वाज्ज्ञानबन्धुः स उच्यते ।। ४

वसनाशनमात्रेण तुष्टाः शास्त्रफलानि ये ।

जानन्ति ज्ञानबन्धूंस्तान्विद्याच्छास्त्रार्थशिल्पिनः ।। ५

प्रवृत्तिलक्षणे धर्मे वर्तते यः श्रुतोचिते ।

अदूरवर्तिज्ञानत्वाज्ज्ञानबन्धुः स उच्यते ।। ६

आत्मज्ञानं विदुर्ज्ञानं ज्ञानान्यन्यानि यानि तु ।

तानि ज्ञानावभासानि सारस्याऽनवबोधनात् ।। ७

आत्मज्ञानमनासाद्य ज्ञानान्तरलवेन ये ।

संतुष्टाः कष्टचेष्टं ते ते स्मृता ज्ञानबन्धवः ।। ८

ज्ञानादितज्ज्ञेयविकाशशान्त्या

विना न संतुष्टधियेह भाव्यम् ।

त्वं ज्ञानबन्धुत्वमुपेत्य राम

रमस्व मा भोगभवामयेषु ।। ९

अत्राहारार्थं कर्म कुर्यादनिन्द्यं

कुर्यादाहारं प्राणसंधारणार्थम् ।

प्राणाः संधार्यास्तत्त्वजिज्ञासनार्थं

तत्त्वं जिज्ञास्यं येन भूयो न दुःखम् ।। १०

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मो० निर्वाणप्रकरणे उत्तरार्धे ज्ञानविचारो नामैकविंशः सर्गः ।। २१ ।।